5

1075CH05

# रचनानुवादः (वाक्यरचनाकौशलम्)

**1. अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–**

एकः राजा आसीत्। सः याचकेभ्यः धनं ददाति स्म। तेन सह राज्ञी अपि दानं यच्छति स्म। ततःपरं सा रथेन राजभवनं गच्छति। नृपस्य पुत्रः विद्वान् न आसीत्। सः पुत्रं गुरुकुलं प्रैषयत्। गुरुकुले सः आचार्यात् अध्ययनम् अकरोत्। प्रसन्नः राजा आचार्यम् अकथयत्- "भो आचार्य! अहम् कृतज्ञः अस्मि।"

अधुना वाक्याधारितानि प्रश्नोत्तराणि ध्यानेन पठन्तु—

| | प्रश्नः | उत्तरम् |
|---|---|---|
| (i) | एकः कः आसीत्? | राजा |
| (ii) | सः कं गुरुकुलं प्रैषयत्? | पुत्रम् |
| (iii) | सा केन राजभवनं गच्छति स्म? | रथेन |
| (iv) | सः केभ्यः धनं ददाति स्म? | याचकेभ्यः |
| (v) | सः कस्मात् अध्ययनं करोति स्म? | आचार्यात् |
| (vi) | कस्य पुत्रः विद्वान् न आसीत्? | नृपस्य |
| (vii) | सः कुत्र अध्ययनं करोति स्म? | गुरुकुले |
| (viii) | राजा आचार्यं कथं सम्बोधयति? | भो आचार्य! |

☞ अत्र वयं पश्यामः– प्रथमे वाक्ये 'राजा' इति पदं कर्ता अस्ति। यः क्रियां सम्पादयति सः कर्ता। कर्तरि च प्रथमा विभक्तिः प्रयुज्यते अतः 'राजा' इति पदे प्रथमा विभक्तिः अस्ति।

☞ द्वितीये प्रश्नोत्तरे 'पुत्रम्' कर्मकारकम् अस्ति। क्रियायाः फलं यस्मिन् पतति तत् कर्मसंज्ञकं भवति। 'कर्मणि द्वितीया' सूत्रानुसारेण 'पुत्रम्' इति पदे द्वितीया विभक्तिः प्रयुक्ता।

☞ तृतीये प्रश्नोत्तरे 'रथेन' इति पदे रथस्य साधनत्वात् करणार्थे तृतीया विभक्तिः प्रयुक्ता यतः 'साधकतमं करणम्' करणे च तृतीया विभक्तिः भवति।

☞ चतुर्थे प्रश्नोत्तरे 'याचकेभ्यः' पदे चतुर्थी विभक्तिः अस्ति। यस्मै किमपि दीयते क्रियते वा तत् सम्प्रदानम् भवति। सम्प्रदाने च चतुर्थी विभक्तिः भवति।

© NCERT not to be republished

- ☞ पञ्चमे प्रश्नोत्तरे 'आचार्यात्' इति पदे पञ्चमी-विभक्ते: प्रयोग: वर्तते। यस्माद् अधीते, गृह्यते पृथक्क्रियते वा अपादानं भवति। अपादाने पञ्चमी-विभक्ति: प्रयुज्यते।
- ☞ षष्ठे प्रश्नोत्तरे 'नृपस्य' इति पदं पुत्रेण सह सम्बन्धं ज्ञापयति। सम्बन्धे च षष्ठी विभक्ति: भवति अत: 'नृपस्य' पदे षष्ठी विभक्ति: प्रयुक्ता।
- ☞ सप्तमे प्रश्नोत्तरे 'गुरुकुलम्' अध्ययनकार्यस्य आधार: अस्ति। 'आधारोऽधिकरणम्' इत्यनेन आधारस्य अधिकरण-संज्ञा भवति अधिकरणे च सप्तमी-विभक्ति: प्रयुज्यते अत एव 'गुरुकुले' इति पदे सप्तम्या: विभक्त्या: प्रयोग: वर्तते।
- ☞ अष्टमे प्रश्नोत्तरे नृप: आचार्यं 'भो आचार्य!' इति सम्बोधयति। सम्बोधने अपि प्रथमा विभक्ति: एव प्रयुज्यते।

**संक्षिप्तरूपेण इदं ध्यातव्यम्**

| **विभक्ति:** | **कारकम्** |
|---|---|
| प्रथमा | कर्ता |
| द्वितीया | कर्म |
| तृतीया | करणम् |
| चतुर्थी | सम्प्रदानम् |
| पञ्चमी | अपादान |
| षष्ठी | सम्बन्ध: |
| सप्तमी | अधिकरणम् |
| सम्बोधनम् | सम्बोधनम् |

**2. अनुवाद-प्रक्रियायां विभक्ति-प्रयोगार्थम् एतदपि स्मरणीयम्।**

| | |
|---|---|
| द्वितीया | अभित:, परित: सर्वत:, उभयत:, समया, निकषा, हा, प्रति, धिक्, उपरि, अध:, विना, अन्तरा, अन्तरेण, ✓गम्, ✓रक्ष् योगे |
| तृतीया | सह, समम्, साकम्, सार्धम्, सदृशम्, सम:, अलम्, विना योगे अङ्गविकारे च। |
| चतुर्थी | ✓दा, ✓रुच्, ✓क्रुध्, ✓कुप्, ✓द्रुह्, ✓स्पृह्, ✓असूय्, ईर्ष्य्, नम:, स्वस्ति, स्वाहा योगे |
| पञ्चमी | ✓भी, ✓त्रा, ✓त्रस्, ऋते, प्रभृति, पृथक्, आरभ्य, दूरम्, बहि:, अनन्तरम्, पूर्वम्, प्राक्-योगे, द्वयो: निर्धारणे |
| षष्ठी | कृते, हेतु:, समक्षम्, मध्ये, अन्त:, दूरम्, अनादरम्, अध:, उपरि, पुर:, निर्धारणे |
| सप्तमी | ✓स्निह्, वि✓श्वस्, प्रवीण:, कुशल:, चतुर:, निर्धारणे, सति सप्तमी |



© NCERT not to be republished

**3. एतानि वाक्यानि पठन्तु —**

| | |
|---|---|
| पठति | एक बालक पढ़ रहा है। |
| विकसत: | पुष्पे |
| कूर्दन्ते | बन्दर वृक्ष पर कूद रहे हैं। |
| पतन्ति | पत्राणि |

**ध्यातव्यम्** —

(क) उपरिप्रदत्तानि स्थूलपदानि कर्तृपदानि सन्ति।

(ख) कर्तृपदेषु प्रथमा विभक्ति: प्रयुक्ता।

(ग) क्रियापदस्य अन्विति: कर्तृपदै: सदैव भवति।

**4. अधुना एतानि वाक्यानि पठत —**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|
| बाल: गच्छति। | बालौ गच्छत:। | बाला: गच्छन्ति। |
| कन्या गच्छति। | कन्ये गच्छत:। | कन्या: गच्छन्ति। |
| त्वं गच्छसि। | युवाम् गच्छथ:। | यूयं गच्छथ। |
| अहं गच्छामि। | आवां गच्छाव:। | वयं गच्छाम:। |

अत्र वयं पश्याम: यत् लिङ्गपरिवर्तनेन क्रियापदेषु किमपि परिवर्तनं न भवति परन्तु वचन-परिवर्तनेन पुरुषपरिवर्तनेन च क्रियापदानि परिवर्तितानि भवन्ति।

© NCERT not to be republished

संस्कृते क्रियाया: मूलरूपं धातु: भवति। धातो: प्रयोग: दशलकारेषु भवति। तेषु प्रमुखा: पञ्चलकारा: अधोनिर्दिष्टा: सन्ति, अवशिष्टा: पञ्चलकारा: छात्रै: अन्वेषणीया: —

| | | |
|---|---|---|
| लट् लकार: | — | वर्तमानकाले |
| लृट् लकार: | — | भविष्यत्काले |
| लङ् लकार: | — | भूतकाले |
| लोट् लकार: | — | आज्ञार्थे आदेशादि-अर्थे |
| विधिलिङ् लकार: | — | विध्यर्थे सम्भावनादि-अर्थे |

प्रत्येकं लकारे त्रय: पुरुषा: (प्रथम:, मध्यम:, उत्तम: च) त्रीणि च वचनानि (एकवचनम्, द्विवचनम्, बहुवचनञ्च भवन्ति।

**5. अधुना वाक्यरचनाम् अवगच्छाम:—**

| | | |
|---|---|---|
| अद्यत्वे त्वं कुत्र वससि? | — | आजकल तुम कहाँ रहते हो?<br>*Where do you stay now a days?* |
| अस्माकं विद्यालये वार्षिकोत्सव: अस्ति। | — | हमारे विद्यालय में वार्षिकोत्सव है।<br>*There is annual function in our school.* |
| भवत: लेख: उत्तम: आसीत्। | — | आपका लेख उत्तम था।<br>*Your essay was the best.* |
| त्वं गृहकार्यं कदा करिष्यसि? | — | तुम अपना गृहकार्य कब करोगे?<br>*When will you do your homework?* |
| परिश्रमी सदैव सफल: भवति। | — | परिश्रमी सदैव सफल होता है।<br>*Labourious people always succeed.* |
| गङ्गाया: जलं पवित्रं भवति। | — | गंगा का जल पवित्र होता है।<br>*The water of Ganga is pure.* |
| विद्यया विना जीवनं व्यर्थम्। | — | विद्या के बिना जीवन व्यर्थ है।<br>*Life is futile without knowledge.* |
| भो छात्रा:! सदैव सत्यं वदत। | — | हे छात्रो! सदा सत्य बोलो।<br>*Dear students! Always speak the truth.* |

© NCERT not to be republished

महाकवि: कालिदास: सप्तग्रन्थान् अरचयत्। — महाकवि कालिदास ने सात ग्रन्थों की रचना की।

*The great poet Kalidas wrote seven granthas (books).*

वयं वृद्धजनानां सम्मानं कुर्याम। — हमें वृद्धजनों का सम्मान करना चाहिए।

*We should respect the elderly people.*

## अभ्यास:

**1. अधोलिखितवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) छात्रों को ध्यान से कार्य करना चाहिए। ..........................

(ii) वृक्ष पर पक्षी चहचहाते हैं। ..........................

(iii) हम सब मिलकर गाएंगे। ..........................

(iv) खिलाड़ी फुटबॉल से खेल रहे हैं। ..........................

(v) अध्यापक ने कहा— "सदाचार का पालन करो।" ..........................

(vi) कृषक गाँव की ओर गए। ..........................

(vii) तुम दोनों खीर खाओ। ..........................

(viii) विद्यालय के दोनों ओर वृक्ष हैं। ..........................

(ix) माता बालक को दूध देती हैं। ..........................

(x) हमें स्वास्थ्य के नियमों का पालन करना चाहिए। ..........................

(xi) कल राघव कहाँ था? ..........................

(xii) मेरे पिता भोजन पकाते हैं। ..........................

(xiii) मेरे पास आकर बैठो। ..........................

(xiv) उन सबको दीवाली उत्सव अच्छा लगता है। ..........................

(xv) ईश्वर को नमस्कार। ..........................

(xvi) घर के बाहर कौन है? ..........................

(xvii) भवन के ऊपर कौए बैठे हैं। ..........................



© NCERT not to be republished

(xviii) मैंने ऐसा नहीं कहा। ..............................

(xix) कक्षा में कितने छात्र हैं? ..............................

(xx) तुम बाज़ार से दही लाओ। ..............................

**2. प्रत्ययाधारिता वाक्य-संरचना**

गुरुं **सेवमानेन** छात्रेण या विद्या **अर्जिता** सा पूर्णजीवने तस्य सहायिका **भूतवती। जीवने** ज्ञानमेव सर्वथा **प्राप्तव्यम्** यत: ज्ञानं विना न कोऽपि **पूजनीय:**।

अत्र स्थूलाक्षरपदानि प्रत्यय-युक्तानि सन्ति।

वाक्येषु प्रत्यय-प्रयोगार्थम् एते बिन्दव: ध्यातव्या:।

* शतृ-प्रत्ययस्य प्रयोग: परस्मैपदिधातुभि: सह भवति। शानच्प्रत्ययस्य प्रयोग: आत्मनेपदिधातुभि: सह भवति। आभ्यां प्रत्ययाभ्यां निर्मितपदानां प्रयोग: विशेषणरूपेण भवति।
* क्त-क्तवतु-प्रत्यययो: प्रयोग: भूतकालार्थे क्रियते। क्त-प्रत्ययस्य प्रयोग: कर्मवाच्ये भाववाच्ये च भवति। क्तवतु-प्रत्ययस्य प्रयोग: कर्तृवाच्ये एव भवति।

* तव्यत्-अनीयर्-प्रत्यययो: प्रयोग: विधिलिङ्लकारस्य अर्थे भवति। एताभ्यां प्रत्ययाभ्यां निर्मितपदानां प्रयोग: क्रियारूपेण विशेषणरूपेण च भवति।
  • भवन्त: एतेषां प्रत्ययानां विशिष्ट-अध्ययनम् अग्रिमेषु अध्यायेषु करिष्यन्ति।

एतानि वाक्यानि पठत—

| | | | |
|---|---|---|---|
| 1. | मित्र की सहायता करनी चाहिए। | मित्रस्य सहायता कर्तव्या। | *A friend should be helped.* |
| 2. | उसने क्या कहा? | स: किम् उक्तवान्? | *What did he say?* |
| 3. | मैंने उसे धन दिया। | मया तस्मै धनं दत्तम्। | *I gave him money.* |
| 4. | कार्य करते हुए ही सब साध लेते हैं। | कार्यं कुर्वन्त: एव सर्वं साधयाम:। | *Everything is achieved by doing practice.* |
| 5. | यह चलचित्र भूलने योग्य नहीं है। | इदं चलचित्रम् अविस्मरणीयम् न अस्ति। | *This movie is unforgettable.* |
| 6. | बढ़ता हुआ चन्द्रमा पूर्णता को पाता है। | वर्धमान: चन्द्र: पूर्णतां याति। | *The rising moon attains completion.* |

**3. एतेषां वाक्यानां संस्कृतभाषया अनुवादं कुरुत —**

(i) उसने पत्र लिखा। — ..........

(ii) खाते हुए नहीं बोलना चाहिए। — ..........

(iii) उस कन्या ने पुस्तक पढ़ी। — ..........

(iv) तुम्हें भी पुस्तक पढ़नी चाहिए। — ..........

(v) वह फल लेकर घर आई। — ..........


(vi) तुमने ऐसा नहीं सोचा। — ..........

(vii) पुस्तक पाता हुआ छात्र प्रसन्न होता है। — ..........

(viii) जाते हुए बालक को देखो। — ..........

(ix) शिमला नगर देखने योग्य है। — ..........

(x) खाने योग्य भोजन ही खाना चाहिए। — ..........




© NCERT not to be republished